श्री सूर्य स्तोत्रं (देव कृतं)

श्री सूर्य स्तोत्रं (देव कृतं)

देवा ऊचुः |
नमस्ते ऋक्स्वरूपाय सामरूपाय ते नमः |
यजुः स्वरूपरूपाय साम्नां धामवते नमः || 1 ||

ज्ञानैकधामभूताय निर्धूततमसे नमः |
शुद्धज्योतिः स्वरूपाय विशुद्धायामलात्मने || 2 ||

चक्रिणे शंखिने धाम्ने शार्ङ्गिणे पद्मिने नमः |
वरिष्ठाय वरेण्याय परस्मै परमात्मने || 3 ||

नमोऽखिलजगद्व्यापिस्वरूपायात्ममूर्तये |
सर्वकारणभूताय निष्ठायै ज्ञानचेतसां || 4 ||

नमः सूर्यस्वरूपाय प्रकाशात्मस्वरूपिणे |
भास्कराय नमस्तुभ्यं तथा दिनकृते नमः || 5 ||

शर्वरीहेतवे चैव संध्याज्योत्स्नाकृते नमः |
त्वं सर्वमेतद्भगवन् जगदुद्भ्रमता त्वया || 6 ||

भ्रमत्या विद्धमखिलं ब्रह्मांडं सचराचरं |
त्वदंशुभिरिदं स्पृष्टं सर्वं संजायते शुचिः || 7 ||

क्रियते त्वत्करैः स्पर्शाज्जलादीनां पवित्रता |
होमदानादिको धर्मो नोपकाराय जायते || 8 ||

तावद्यावन्न संयोगि जगदेतत् त्वदंशुभिः |
ऋचस्ते सकला ह्येता यजूंष्येतानि चान्यतः || 9 ||

सकलानि च सामानि निपतंति त्वदंगतः |
ऋङ्मयस्त्वं जगन्नाथ त्वमेव च यजुर्मयः || 10 ||

यतः साममयश्चैव ततो नाथ त्रयीमयः |
त्वमेव ब्रह्मणो रूपं परं चापरमेव च || 11 ||

मूर्तामूर्तस्तथा सूक्ष्मः स्थूलरूपस्तथा स्थितः |
निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः |
प्रसीद स्वेच्छया रूपं स्वतेजः शमनं कुरु || 12 ||

इदं स्तोत्रवरं रम्यं श्रोतव्यं श्रद्धया नरैः |
शिष्यो भूत्वा समाधिस्थो दत्त्वा देयं गुरोरपि || 13 ||

इति श्रीमार्कंडेयपुराणे पंचसप्ततितमोऽध्याये देव कृत श्री सूर्य स्तोत्रं |